इति भाषा ॥ तत्पर्य्यायः । वदरः २ गोपघोण्टा ३ शृगालकोलिः ४ कपिकोलिः ५ । इति क्वचित् रत्नमाला ॥ हस्तिकोलिः ६ वदरीच्छदा ७ कर्कन्धुः । इति रत्नकोषः ॥ पूगवृक्षः । इति मेदिनी । टे । १४ ॥ (यथा, उत्तरस्थाने त्रिंशेऽध्याये वाभटेनोक्तम् ।

"घोण्टाफलत्वग्वयं सलाचं
वृकस्य पत्रं वनितापयश्च ।
सुगर्कदुग्धान्वित एष कल्को
वर्त्तीकृतो हन्त्यचिरेण नाड़ीम् ॥")

घोनसः, पुं, (गोनसः + पृषोदरादित्वात् साधुः ।) गोनसः । तिलित्ससर्पः । इति हेमचन्द्रः । ४ । ३६२ ॥ (क्वचित् मूर्द्धन्यमध्योऽपि दृश्यते ॥)

घोरं, क्ली, (हन्यते वध्यतेऽनेनेति । हन् + "हन्ते रच् घुर् च ।" उणां । ५ । ६४ । इति अच् धातोर्घुरादेशश्च ।) विषम् । इति राजनिर्घण्टः ॥

घोरः, पुं, (घोरयति भयानकरसनिमित्तीभवतीति । घुर + अच् । यद्वा, हन्ति विनाशयति रुद्ररूपेण इति । हन वधे + "हन्तेरच् घुर् च ।" उणां । ५ । ६४ । इति अच् धातोर्घुरादेशश्च ।) शिवः । भयानके त्रि । इति हेमचन्द्रः ॥ (यथा, मनुः । १२ । ५४ । [चयात् ।
"बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत्संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥")

घोरदर्शनः, पुं स्त्री, (घोरं भयानकं दर्शनं यस्य ।) उलूकः । इति राजनिर्घण्टः ॥ भयानकरूपे त्रि ॥ (यथा, रामायणे । १ । १ । ५५ ।
"मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह । कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥")

घोरपुष्पं, क्ली, कांस्यम् । इति राजनिर्घण्टः ॥ घोरघुष्यमपि पाठः ॥

घोररासनः, पुं, (घोरं भयानकं रासनं शब्दो यस्य ।) शृगालः । इति शब्दरत्नावली ॥

घोररासी, [न्] पुं, (घोरं यथा तथा रसति शब्दं करोतीति । रस शब्दे + णिनिः ।) शृगालः । इति हेमचन्द्रः । ४ । ३५६ ॥

घोरा, स्त्री, (घोरति भयानकरसनिमित्तीभवतीति । घुर + अच् + टाप् च ।) रात्रिः । इति त्रिकाण्डशेषः ॥ देवदाली लता । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २९ । ५५ ।
"घण्टारवप्रिया घोराऽघौघविध्वंसकारिणी ॥")
रविसंक्रान्तिविशेषः । इति ज्योतिषम् ॥ यथा, तिथितत्त्वे रविसंक्रान्तिप्रकरणे ।
"मन्दा मन्दाकिनी ध्वांक्षी घोरा चैव महोदरी । राक्षसीमिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ! ॥ मन्दा ध्रुवेषु विज्ञेया मृदौ मन्दाकिनी तथा । क्षिप्रे ध्वांक्षी विजानीयादुग्रे घोरा प्रकीर्त्तिता ॥")
भयानका ॥ (यथा, कालीध्याने ।
"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ॥")

घोलं, क्ली, (घुलति आलोड्यते यत् । घुट + अच् । पृषोदरादित्वात् साधुः ।) ससरं निर्जलं मथितं दधि । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"यत्तु सस्नेहमजलं मथितं घोलमुच्यते ॥")
तत्पर्य्यायः । दण्डाहतम् २ कालसेयम् ३ अरिष्टम् ४ गोरसः ५ घलम् ६ मलिनम् ७ केवलम् ८ भग्नसन्धिकम् ९ । तस्य भेदाः ।
"तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बुनिर्जलम् । ससारं यद्भवेत्तक्रं कट्वरं तत् प्रकीर्त्तितम् ॥"
इति शब्दचन्द्रिका ॥
अस्य विशेषाः तक्रशब्दे द्रष्टव्याः ॥

घोली, स्त्री, पत्रशाकविशेषः । तत्पर्य्यायः । घोलिका २ घोलिः ३ कलम्बुः ४ क्षुद्रकाम्बुका ५ । क्षेत्रजाताया अस्या गुणाः । लवणत्वम् । रुचिकारित्वम् । अम्लत्वम् । वातकफनाशित्वञ्च ॥ आरामघोलिकागुणाः । अम्लत्वम् । रूक्षत्वम् । रुच्यत्वम् । वायुनाशित्वम् । पित्तश्लेष्मकारित्वञ्च । सूक्ष्मायाः जीर्णज्वरनाशित्वम् । इति राजनिर्घण्टः ॥

घोषं, क्ली, (घोषति शब्दायते इति । घुष विशब्दने + अच् ।) कांस्यम् । इति राजनिर्घण्टः ॥

घोषः, पुं, (घोषन्ति शब्दायन्ते गावो यस्मिन् । घुषिर् विशब्दने + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) आभीरपल्ली । (यथा, रघुः । १ । ४५ ।
"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् । नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥")
घोषति शब्दायते इति । घुष + कर्त्तरि अच् ।) गोपालः । (घुष + भावे घञ् ।) ध्वनिः । (यथा, मनुः । ७ । २२५ ।
"तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः । संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥")
घोषकलता । कांस्यम् । मेघशब्दः । इति मेदिनी । षे । ११ ॥ मशकः । इति त्रिकाण्डशेषः ॥ (वर्णोच्चारणवाह्यप्रयत्नविशेषः । यदुक्तं शिक्षायाम् । २० ।
"संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् । घोषा वा संवृताः सर्व्वे अघोषा विवृताः स्मृताः ॥")
कायस्थादीनां पद्धतिविशेषः । (यथा, कुलदीपिकायाम् ।
"वसुवंशे च मुख्यौ द्वौ नाम्ना लक्ष्मणपूषणौ । घोषेषु च समाख्यातश्चतुर्भुजमहाकृती ॥")

घोषकः, पुं, (घोष एव । घोष + संज्ञायां कन् ।) घोषालता । तत्पर्य्यायः । धामार्गवः २ । इत्यमरः । २ । ४ । ११७ ॥ घोषकाकृतिः ३ आदानी ४ देवदाली ५ तुरङ्गकः ६ घोषः ७ घोषालता ८ । इति शब्दरत्नावली ॥ कोषकालः ९ । इति जटाधरः ॥ महांश्चेत् हस्तिघोषातकी ॥ * ॥ पीतघोषायाः पर्य्यायः । धामार्गवः १ पीतघोषा २ राजघोषातकी ३ कर्कोटकी ४ महाजाली ५ चूड़ः ६ कोषफला ७ कोषातकी ८ । इति च जटाधरः ॥ * ॥ श्वेतघोषायाः पर्य्यायः । घोषातकी १ मृदङ्गी २ जालिनी ३ क्षतवेधकः ४ श्वेतपुष्पा ५ आकृतिच्छत्रा ६ ज्योत्स्ना ७ इति रत्नमाला ॥

घोषकाकृतिः, पुं, (घोषकस्य घोषलताया आकृतिरिवाकृतिर्यस्य ।) घोषकः । इति रत्नमाला ॥

घोषणा, स्त्री, (घुषिर् विशब्दने + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) उच्चैःशब्दः । लोकविज्ञापनायोच्चैःशब्दितम् । (यथा, कथासरित्सागरे । २४ । ५० ।
"गच्छ भ्रमय कृत्स्नेऽत्र पुरे पटहघोषणाम् ॥")
तत्पर्य्यायः । उच्चैर्घुष्टम् २ । इत्यमरः । १ । ६ । २ ॥ निघुष्टम् ३ घुष्टघोषणम् ४ । इति शब्दरत्नावली ॥

घोषयित्नुः, पुं, (घोषयतीति । घुष् + णिच् + बाहुलकात् इत्नुच् ।) ब्राह्मणः । कोकिलः । वन्दी । इति शब्दरत्नावली ॥

घोषवती, स्त्री, (घोषो विद्यतेऽस्याः । घोष + मतुप् मस्य वः । स्त्रियां ङीप् ।) वीणा । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । ११ । ३ ।
"स बभूव शनै राजा सुखैकान्ततत्परः । सदा सिषेवे मृगयां वीणां घोषवतीञ्च ताम् । दत्तां वासुकिना पूर्व्वं नक्तं दिनमवादयत् ॥"
तथाच तत्रैव । १२ । ३२ ।
"अङ्के घोषवती तस्य कण्ठे गीतश्रुतिस्तथा ॥")
शब्दविशिष्टे त्रि ॥ (यथा, महाभारते । १ । २५ । ११ ।
"त्वं वज्रमतुलं घोरं घोषवांस्त्वं बलाहकः ॥")

घोषा, स्त्री, (घोष्यन्ते मधुकरी यया । घुष + णिच् + घञ् ।) मधुरिकौषधिः । मौरी इति भाषा । इति मेदिनी ॥ (यथा, गारुड़े १९ अध्याये ।
"घोषाफलं सैन्धवञ्च तस्मिन्प्राशः पतेत्तथा ॥")
कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २९ । ५५ ।
"घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥"
गायत्त्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४४ ।
"घृणिमन्त्रमयी घोषा घनसम्पातदायिनी ॥")

घोषातकी, स्त्री, श्वेतघोषा । इति रत्नमाला ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"घोषातकी मृदङ्गी स्याज्जालिनी क्षतवेधनः । श्वेतपुष्पा कृतिच्छत्रा ज्योत्स्नाकोषातकी क्वचित् ॥")

घ्रा, गन्धोपादाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) जिघ्रति पुष्पं लोकः । इति दुर्गादासः ॥

घ्राणं, क्ली, (जिघ्रत्यनेनेति । घ्रा + करणे ल्युट् । यद्वा, घ्रा + क्तः "नुदविदोन्दत्राघ्रेति ।" ८ । २ । ५६ । इति निष्ठातस्य नो वा ।) नासिका । इत्यमरः । २ । ६ । ८९ ॥ (यथा रघुः । १६ । ११ ।
"घ्राणकान्तमधुगन्धकर्षिणीः
पानभूमिरचनाः प्रियासखः ॥")
न्यायमते घ्राणेन्द्रियग्राह्यगन्धत्वादि । (घ्रा + भावे ल्युट् । आघ्राणम् । यथा, देवीभागवते । १ । १४ । २४ ।
"आलिलिङ्ग सुदुर्भागं मूर्द्ध्नि तस्य चकार ह ॥")
घ्राते त्रि । इति मेदिनी । णे । ११ ॥